# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल् २०१९

**कक्षा**–आचार्य-1(SEM-2) **प्रश्नपत्रम्** – ४ (New & Old) **गुणाः** – ७०

**विषयः** – वास्तुशास्त्रम् **कोड**- **CC- 426** **समयः** – ११ तः २

**दिनाङ्कः** – १३/०४/२०१९ **सन्दर्भग्रन्थः**–बृहद्वास्तुमाला, मत्स्यपुराणम्, मुहूर्तचिन्तामणिः

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१ ध्रुववसुजलपुष्यं नैर्ऋतं मैत्रसंज्ञकम् । नक्षत्रं शुभदं ज्ञेयं तडागे सर्वदा बुधैः ॥

२ चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम् । विहङ्गघृतपङ्क्तान् सेचयेत् क्षीरवारिणा ॥

**प्रश्नः २ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **१०**

१ कपित्थबीजरोपणप्रकारः ।

२ रामदैवज्ञमते जलाशयारामदेवप्रतिष्ठामुहूर्ताः ।

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१ मूलच्छेदं तृणच्छेदं कृमिकीटनिपातनम् । हननं जलजीवानां भूमौ शस्त्रेण घातनम् ॥

२ नक्षत्राणि मुहूर्ताश्च पक्षाहोरात्रसन्धयः । संवत्सरा दिनेशाश्च कलाकाष्ठा लक्षणाः ॥

**प्रश्नः ४ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **१०**

१ मधुपर्केणार्चयित्वा प्रार्थयेत् ।

२ ध्रुवादिग्रहाणां प्रस्तारवशेन षोडशप्रकाराः ।

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ निम्नाङ्कितयोः कस्याप्येकस्य सान्वयं व्याख्यां कुरुत ।** **०५**

१ धनधान्यं च वायव्ये कर्मशालां ततो बहिः । एवं वास्तुविशेषः स्याद् गृहभर्तुः शुभावहः ॥

२ सप्ताश्वं चैकचक्रं च रथं तस्य प्रकल्पयेत् । मुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥

**प्रश्नः ६ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **१०**

१ प्रतिमालक्षणम् ।

२ वास्तुविद्यासु वेधपरिवर्जनम् ।

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ निम्नाङ्कितयोः कस्याप्येकस्य सान्वयं व्याख्यां कुरुत ।** **०५**

१ सूर्यभाद्वेदगोलर्कदिग्विश्वनखसम्मिते । चन्द्रर्क्षे रवियोगाः स्युर्दोषसङ्घविनाशकाः ॥

२ वस्त्राणां नवभागलेषु च चतुष्कोणेऽमरा राक्षसा
मध्यत्र्यंशगता नरास्तु सदृशे पाशे च मध्यांशयोः ।
दग्धे वा स्फुटितेऽम्बरे नवतरे पङ्कादिलिप्ते न स-
द्रक्षोंऽशे नृसुरांशयोः शुभमसत्सर्वांशके प्रान्ततः ॥

**प्रश्नः ८ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **१०**

१ शिरोमोक्षणविरेकादिधर्मक्रियामुहूर्तम् ।

२ परीक्षामुहूर्तम् ।

**प्रश्नः ९ निम्नाङ्कितेषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ कति राशयो भवन्ति?

२ तृतीयातिथेः स्वामी कः?

३ पौर्णमास्याः स्वामी कः?

४ रोहिणीनक्षत्रस्याधिष्ठाता को विद्यते?

५ कतिसङ्ख्याकाः वसवः सन्ति?

६ कियन्ति नक्षत्राणि ऊर्ध्वमुखानि?

७ कस्मिन् कर्मणि भौमाश्विनी वर्जयेत्?

८ कानि ध्रुवसंज्ञकानि नक्षत्राणि?

९ रेखादेवता कतिविधा?

१० श्रवणनक्षत्रे वास्तु भवति न वा?

११ मयमतानुसारं भूमिकुलमानं कियत्?

१२ रिक्तातिथयः काः सन्ति?

१३ अश्विनीनक्षत्रस्य स्वामी कोऽस्ति?

१४ तपस्य अर्थात् कः मासः?

१५ मत्स्यमहापुराणस्य कर्ता कः?

०००